# लिंगस्तकम्  Liṅgastakam

ब्रह्म मुरारी सुरार्चित लिङ्गम्  निर्मल भासित शोभित लिङ्गम्
brahma murārī surārcita liṅgam  nirmala bhāsita śobhita liṅgam
जन्मज दुःख विनशन लिङ्गम्
janmaja duḥkha vinaśana liṅgam
तत्प्रणमामि सदाशिव लिङ्गम्  तत्प्रणमामि सदाशिव लिङ्गम्
tatpraṇamāmi sadāśiva liṅgam  tatpraṇamāmi sadāśiva liṅgam

देव मुनि प्रवरार्चित लिङ्गम्  काम-दहन करुणाकर लिङ्गम्
deva muni pravarārcita liṅgam  kāma-dahana karuṇākara liṅgam
रावण दर्प विनाशन लिङ्गम्
rāvaṇa darpa vināśana liṅgam
तत्प्रणमामि सदाशिव लिङ्गम्  तत्प्रणमामि सदाशिव लिङ्गम्
tatpraṇamāmi sadāśiva liṅgam  tatpraṇamāmi sadāśiva liṅgam

सर्व सुगंधि सुलेपित लिङ्गम्  बुद्धि विवर्द्धन कारण लिङ्गम्
sarva sugandhi sulepita liṅgam  buddhi vivarddhana kāraṇa liṅgam
सिद्ध सुरासुर वन्दित लिङ्गम्
siddha surāsura vandita liṅgam
तत्प्रणमामि सदाशिव लिङ्गम्  तत्प्रणमामि सदाशिव लिङ्गम्
tatpraṇamāmi sadāśiva liṅgam  tatpraṇamāmi sadāśiva liṅgam

कनक महामणि भूषित लिङ्गम्  फणिपति वेष्टत शोभित लिङ्गम्
kanaka mahāmaṇi bhūṣita liṅgam  phaṇipati veṣṭata śobhita liṅgam
दक्श सुयज्ञ विनाशन लिङ्गम्
dakśa suyajña vināśana liṅgam
तत्प्रणमामि सदाशिव लिङ्गम्  तत्प्रणमामि सदाशिव लिङ्गम्
tatpraṇamāmi sadāśiva liṅgam  tatpraṇamāmi sadāśiva liṅgam

कुंकुम चन्दन लेपित लिङ्गम्   पंकज हार सुशोभित लिङ्गम्
kuṅkuma candana lepita liṅgam  paṅkaja hāra suśobhita liṅgam
संचित पाप विनाशन लिङ्गम्
sañcita pāpa vināśana liṅgam
तत्प्रणमामि सदाशिव लिङ्गम्   तत्प्रणमामि सदाशिव लिङ्गम्
tatpraṇamāmi sadāśiva liṅgam  tatpraṇamāmi sadāśiva liṅgam

देवगणार्चित सेवित लिङ्गम्   भावैर्भक्ति भिरेव च लिङ्गम्
devagaṇārcita sevita liṅgam   bhāvairbhakti bhireva ca liṅgam
दिनकर कोटि प्रभाकर लिङ्गम्
dinakara koṭi prabhākara liṅgam
तत्प्रणमामि सदाशिव लिङ्गम्   तत्प्रणमामि सदाशिव लिङ्गम्
tatpraṇamāmi sadāśiva liṅgam   tatpraṇamāmi sadāśiva liṅgam

अष्टदलो परिवेष्टित लिङ्गम्  सर्व समुद्भव कारण लिङ्गम्
aṣṭadalo pariveṣṭita liṅgam   sarva samudbhava kāraṇa liṅgam
अष्ट दरिद्र विनशन लिङ्गम्
aṣṭa daridra vinaśana liṅgam
तत्प्रणमामि सदाशिव लिङ्गम्   तत्प्रणमामि सदाशिव लिङ्गम्
tatpraṇamāmi sadāśiva liṅgam   tatpraṇamāmi sadāśiva liṅgam

सुरगुरु सुरवर पूजित लिङ्गम्  सुरतरु पुष्प सदार्चित लिङ्गम्
suraguru suravara pūjita liṅgam   surataru puṣpa sadārcita liṅgam
परात्परं परमात्मक लिङ्गम्
parātparaṁ paramātmaka liṅgam
तत्प्रणमामि सदाशिव लिङ्गम्   तत्प्रणमामि सदाशिव लिङ्गम्
tatpraṇamāmi sadāśiva liṅgam   tatpraṇamāmi sadāśiva liṅgam